National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022 1(42): 239-242
© 2022 NJHSR
www.sanskritarticle.com

**डॉ.श्रीनिवासपण्डा**
सहायकाचार्यः,ज्योतिर्विज्ञानविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

**Correspondence:**
**डॉ.श्रीनिवासपण्डा**
सहायकाचार्यः,ज्योतिर्विज्ञानविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

# विविधप्रकारेण शालानां विन्यासः

**डॉ.श्रीनिवासपण्डा**

पदविन्यासे भूखण्डस्य क्षेत्रस्य देवतानुसारेण विभाजनं वर्गानुसारं कृत्वा तद् अधिष्ठितदेवतायाः गुणस्वरूपस्वभावानुसारेण शालायाः निर्माणं क्रियते। पदविन्यासा-नुसारेण कस्यां दिशि कस्याः शालायाः विन्यासः इति जिज्ञासायां राजवल्लभमण्डनस्य प्रथमे अध्याये बहु विस्तृत वर्णनं वर्तते।

वास्तुपदानुसारेण गृहाभ्यन्तरे का स्थितिः स्यात् इत्यस्मिन् कथ्यते यत् पश्चिमदिशायां सुग्रीववरूपणासुरपुष्पदन्तपदेषु अश्वशालायाः निर्माणं दौवारिकपदे, युद्धगृहं गन्धर्व पदे नृत्यकक्ष इन्द्रजयेन्द्रपदाये, राजमातुः कक्षं रुद्रपदे राजमहिषीकास, सत्यपदे, धर्मकक्ष सूर्यपदे, व्ययकर च कोषगृहं निर्मीयात् इति। अत एव राजवल्लभे विद्यते यत्-

**सुग्रीवे वरुणेऽ सुरे गणवरे स्याद् घोटकानां गृहं**
**द्वास्ये युद्धगृहं च नृत्यरमणं गन्धर्वदेवाश्रितम् ।**
**राज्ञो मातृगृहं जयेन्द्रजयके रूद्रे महिष्याः गृहं**
**सत्ये धर्मगृहं रवौ व्ययगृहं प्रोक्तं जये श्रीगृहम्।।**[१]

तथैव ईशानकोणपूर्वदिशायाश्च मध्ये गर्दभशाला अश्वशाला च, वायव्यकोणे भृशपदे वा मान्यभण्डारः, ईशानकोणे च शिवालय: स्यात् । अत एव-

**ईशनाच्ययोरन्तरे गर्दमानुमुष्ट्राणां वा स्थानमेवात्रकार्यम् ।**
**धान्यागारं स्यात्तथा प्राणकोणे भृशेऽप्येवं शम्भुकोणे शिवार्चा।**[२]

पूर्वपश्चिमवायव्याग्नेये अपि नृत्यशाला भवितुम् अर्हति। शौचालयं पाकशालायाश्च क्रमश: नैऋत्ये पश्चिमे च शुभा इति प्रतिपादितम् इत्थं यथा- प्राक्पश्चिमे मारुतवतिकोणे वर्त्तते यत् प्रवीणैः अपि नृत्यशाला वर्गागृहं रात्रिचरस्य कोणे स्यात् पश्चिमे भोजनशालिका च राजभवनस्य पूर्वदिशायां शोभास्थल, सम्मुखे पुत्रादीनां वामभागे योद्धानां दक्षिणे छत्रचामरादीनां तपस्वीगुर्वादीनां ताम्बूलवाहकानां च स्थितिः स्यात् इति राजभवनस्य आभ्यन्तरस्थितिवशात् नियमाः प्रोक्ताः तद्यथा-

**प्राक्शोभा नृपमन्दिरस्य पुरतः स्थानं तथा पुत्रक**
**वामाङ्गे नृपतेस्तथा युधधरा कृष्णः तनुत्राणि च।**
**छत्रं चामरतापसाः स्वगुरवस्ताम्बुलपुधृक्षिणे।**
**गेहाधीशयदृच्छया च शवनं सर्वासु भूमीषु च ।।**[३]

विवस्वान् पदे शयनकक्षः, सविता पदे वाद्यादिगृहं, पूषापदे आग्नेयकोणे पाकशाला निर्मीयते। अत एव-

**विवस्वदाख्येऽयनं प्रशस्तं वादित्रगेहं सवितुर्विधेयम् ।**
**पूषाश्रितं भोजनमन्दिरश्च महानसं वह्निदिशे विभागे।।**[४]

**दिशानुसारेण गृहशालाविन्यासः-**

दिशानुसारेण कस्यां दिशायां कीदृशभवनस्य स्थितिः भवितव्याः तद् विषये विविधा आचार्याणां विविधानि मतानि सन्ति। तत्र सर्वप्रथम आचार्यविश्वकर्ममते-

| **क्र.सं. दिशा** | **आभ्यन्तरगृहम्** |
|---|---|
| १. ईशानकोणे | देवगृहम् |
| २. पूर्वदिशि | स्नानगृहम् |
| ३. अग्निकोणे | भोजनालयम् |
| ४. उत्तरदिशि | भण्डारगृहम् |
| ५. अग्निकोणपूर्वदिशिमध्ये | दुग्धादीनां मथनगृहम् |
| ६. अग्निकोणदक्षिणे | घृतगृहम् |
| ७. दक्षिणनैरृत्योर्मध्ये | शौचालयम् |
| ८. नैत्यपश्चिमयोर्मध्ये | विद्याध्ययनकक्षम् |
| ९. पश्चिमवायव्यकोणे | सामूहिककक्षः |
| १०. वायव्योत्तरकोणे | शयनकक्षः (रतिगृहम्) |
| ११. उत्तर-ईशानयोर्मध्ये | औषधिकक्षः |
| १२. नैत्यकोणे | प्रसूतिगृहम् |

**आग्नेयां पाकसदनं भाण्डारं गृहमुतरे।।**
**आग्नेयपूर्वयोर्मध्ये दधिमन्थमन-मन्दिरम्।**
**अग्निप्रेतशयोर्मध्ये आज्यगेहं प्रशस्यते।।**
**याम्यनैऋत्ययोर्मध्ये विद्याभ्यासस्य मन्दिरम्।**
**नैऋत्याम्बुपयोर्मध्ये पुरीषत्यागमन्दिरम्।।**
**पश्चिमानिलयोर्मध्ये रोदनार्थं गृहं स्मृतम्।**
**वायवोत्तरयोर्मध्ये रतिगेहं प्रशस्यते।।**
**उत्तरेशानयोर्मध्ये औषधार्चं तु कारयेत्।**
**नैऋत्यां सूतिकागेहं नृपाणां भूतिमिच्छता।।**[५]

प्राचीनकाले गोधनम् अतीवमहत्त्वपूर्णम् आसीत्। अतः दुग्धचि-घृतानां व्यवस्थापनाय भिन्नकक्षाणां व्यवस्था कृता। विश्वकर्ममतानुसारेण षोडशकक्षाणां स्थितिः जायते।

**गृहविन्यासे आचार्यवशिष्ठमतम्-**

विश्वकर्ममतापेक्षया नूतनव्यवस्था संयोजिता वशिष्ठेन, वसिष्ठानुसारेण मध्ये आलिन्दः स्थाप्यते। आलिन्दो नाम कक्षभिते बहिः आवागमनार्थं मार्गः, कैश्चित्तु आलिन्दः गृहस्य बाह्यभागः स्वीक्रियते। यथा-

**प्रघाणप्रघमालिन्दा बहिर्द्वारप्रकोष्ठके।**[६]

समराङ्गणसूत्रधारोऽपि-

**शालामे बल्भी या स्यात् आलिन्देति वदन्ति ताम्।**[७]

वास्तुकारेण तु-

**अलिन्दशब्देन शालाभितेबाह्ये या गभनिका।**
**दृगाङ्गण सम्मुखी क्रियते सा ज्ञेयेत्युत्पालः।।**[८]

वशिष्ठानुसारेणाभ्यन्तरस्थितिः-

| **क्र.सं. दिशा** | **कक्षः** |
|---|---|
| **१. पूर्वे** | स्नानगृहम् |
| **२. दक्षिणे** | शयनकक्षा |
| **३. पश्चिमे** | भोजनगृहम् |
| **४. वायव्ये** | धान्यमन्दिरगृहम |
| **५. नैऋत्कोणे** | प्रसूतिगृहम् |
| **६. उत्तरे** | भण्डारगृह्यम् |
| **७. ईशाने** | देवगृहम् |

अन्यत् सर्वं प्रायः विश्वकर्मरूपमेव, वस्तुतः विश्वकर्ममतम् अवलम्ब्य एक नूतनं स्वरूपम् अभिनवपद्धत्याः प्रस्तुतं वशिष्ठेन । विद्यते यत् वशिष्ठसंहितायाम्-

**ऐन्द्रयां दिशि स्नानगेहमाग्नेय्यां पचनालयम्।**
**याम्यायां शयनं वेश्म नैऋत्य शिवमन्दिरम्।।**
**वारूण्यां भोजनगृहं वायव्यां पशुमन्दिरम्।**
**उदीच्यां हाटक सद्मं ऐशान्यां देवमन्दिरम्।।**
**ऐन्द्राग्न्योमर्थनं मध्ये याम्याग्यो रतिमन्दिरम्।**
**याम्यराक्षसयोर्मध्ये पुरीषत्यागन्दिरम् ।।**
**राक्षसाम्बुपयोर्मध्ये विद्याभवनभ्यासस्यमन्दिरम् ।**
**तोयेशानिलयोर्मध्ये सदनं रोदनं ततः।।**
**कामोपभोगसदनं वायुकौवेरमध्ययोः।**
**कौवेरेशानयोर्मध्ये चिकित्सासदनं तथा।।**
**पुरन्दरेशयोर्मध्ये सर्ववस्तुसुसंग्रहम्।**
**सदनं कारयेदेवं क्रमादुक्तानि षोडश।।**[९]

**आभ्यन्तरस्थितौ नारदमतम्-**

आचार्यनारदेन पूर्वोक्तमतेषु अन्तरद्वयं प्रतिपादितम्। वायव्यकोणे धान्यगृहस्थाने पशुगृह तथा च चिकित्सा गृहस्थाने दारगृहं निर्मितम्। अत एव-

**भाण्डागारं तूत्तरस्यां वायव्यां पशुमन्दिरम् ।**
**स्नानागार दिशिप्राच्यामाग्नेयां पचनालयम् ।**
**एवं कुर्यादिदं स्थानं क्षीरपानाष्यशालिकाः।**
**शय्यामूत्रास्तद्विद्या भोजनामङ्गलाश्रयाः।।**
**धान्यस्त्रीभोगविजश्च श्रृङ्गारायतनानि च।**
**ईशान्यादि क्रमस्तेषां गृहनिर्माणकं शुभम् ।।**[१०]

दिग्भेदेन कक्षविन्यासविषये वास्तुसारे अपि इत्थमेव प्रतिपादितं यथा-

**वामाङ्गे धनवस्त्रदेवभवनं धातुः श्रियो वाजिनो।**
**नार्यास्त्वौषधभोजनस्थ भवनं स्यादवाटिका वामतः।**
**बहेर्गोजलदन्तिशस्त्रसदनं स्त्रीणां तथा दक्षिणे।**
**स्थानं माहिषमाजमौणिकमिदं याम्याग्निमध्ये शुभम्।।**[११]

वास्तुपदानुसारे अपि आभ्यन्तरकक्षाप्रसङ्गे वर्णितं यथा-

**सुग्रीवे वरूणे सुरे गणवरे स्याद् घोटकानां गृहम्**
**दास्ये युद्धगृहं च नृत्यरमणं गन्धर्वदेवाश्रितम् ।**
**राज्ञो मातृगृहं जयेन्द्रजयके रूद्रे महिष्यां गृहम्**
**सत्ये धर्मगृहं रवौ व्ययगृहं प्रोक्तं जये श्रीगृहम् ।।**[१२]

एवमेव आयानुसारेण कक्षव्यवस्था वर्तते-

**श्रीगृहेऽत्र ध्वजो कार्ये धूमश्चैव महानसे**
**सिंहो निद्रागृहेकार्य श्वा कुर्यादयुधाश्रये।**

**वृषो भोजनशालायां कपिर्धान्यगृहे सदा**
**द्रव्यस्थाने सदा भद्रो रिक्तो देव गृहं तथा।।**

साम्प्रतिकाधुनिकगृहप्रणाल्यां समाहितानां नानाविधकक्षाणाम् उपकरणानाञ्च स्थितिः स्यात् इति वर्णनम् एकैकं प्रस्तूयते-

**१.गवाक्षः-**गवाक्षहीनः त्रिपातकः, कक्षे न्यूनतिन्यूनं द्वौ गवाक्षौ भवेताम्। सूर्यचन्द्रमसोः रश्मयः स्वास्थ्यवर्द्धकाः, तत्कृते गवाक्ष-निर्माणं कर्तव्यम्। पूर्वोत्तरदिशोः गवाक्षः शुभः भवति। उभयस्वस्तिकप्रियवाक्यादिभिः नानाविधगवाक्षाः भवन्ति।

**२.आलिन्दः-** वायोरुपयुक्तागमनार्थं प्राङ्गणं भवेत् यदि चतुर्दिक्षु आलिन्द अपेक्षते तर्हि पूर्वापेक्षया पश्चिमः उत्तरापेक्षया दक्षिणालिन्दा उन्नतो भवेत् ।

**३. द्वारम्-** द्वार चतुर्विधं भवति-

**द्वारं चतुर्विधं प्रोक्तं वास्तुसंक्रान्तिमायजम्।**
**कृत्वा चान्यतमं मुख्यं गवाक्षादद्यौः पराणि च।।**[१३]

वेधरहितं द्वारं स्यात् । द्वारहिते गृह प्रवेशनिषेधो विद्यते-

**अकपाटमनाच्छन्नमदत्तवलिभोजनम्।**
**गृहं न प्रविशेद्धीमान् विपदामाकरं तु तत्।।**

**४.शयनकक्षा-** सर्वेषाम् आचार्याणां मतानुसारे शयनकक्षा दक्षिणे उतरे वा भवेत्। नवदम्पतीनां कृते वायव्योत्तरमध्ये भवेत्। कामोपभोगसदनम् वायुकौवेरमध्यतः इति वचनात्।

**५.स्नानगृहम्-** स्नानगृहं पूर्वदिशायां भवेत्। उत्तरदिशाया अपि अस्य निर्माणं भवितुम् अर्हति। प्रधानगृहं विना स्पृश्यमानं स्नानगृहः निर्मातव्यम्।

**६.पाकगृहम्-** अग्नेः प्राधान्यत्वाद् आग्नेयकोणे अस्य विधानं भवेत्। पूर्वाभिमुखे गृहे आग्नेयकोण पूर्वदिशि, दक्षिणाभिमुखे चेत् आग्नेयकोणे उत्तरे अपि। आग्नेये विधानं कर्त्तव्यम्।

**७.शौचालयम्-** शौचालयः नैर्ऋत्यकोणे भवेत्। स्नानागारसंयुक्तम् अपि शौचालयः निर्मातुं शक्यते। मलमूत्रत्यागकाले मुखं उत्तराभिमुखम् भवेत्।

**८.जलभण्डारः-** भूखण्डस्य मध्ये जलस्रोतेन धननाशः, ऐशान्यां पुष्टिः, पूर्व ऐश्वर्य अतः पूर्वे ऐशान्ये वा जलभण्डारटङ्कीकूपयो-रिङ्गत्यादीनां निर्माणं कर्त्तव्यम्।

**९.सोपानम्-** सोपानस्य निर्माणं तथा भवेत् येन मुखं पूर्व दक्षिणे वा स्यात्। सोपानस्य संख्या विषमा शुभप्रदा। अधस्थद्वारेण ऊर्ध्वस्थ-द्वारस्य उच्छ्रायः द्वादशांशः न्यूनः भवेत्।

भूम्यारोहमूर्ध्यतः तदुपरि प्राग्दक्षिणं शस्यते द्वारं तु उर्ध्व भवं च भूमिरपरा ह्रस्वार्कभागैः क्रमात्-पूर्वतः पश्चिमं प्रति, उत्तरतः दक्षिणं प्रति आरोहः भवेत्। सोपान विषये यथा-

**देवानां मानुषाणाञ्च हार्म्यादीणाञ्च सर्वशः**
**आरोहावरोहार्थं सोपानं लक्षणं तथा।**
**भौमाद्यारोहणार्थं यत्कल्पनं दृढसन्धिकम्**
**सोपानमितितत्प्राहुः मुनयः शास्त्रपारगाः।।**[१४]

सोपाने शुभाशुभं यथा-

**भूम्यारोहणमूर्ध्वतस्तदुपरि प्राग्दक्षिणं शस्यते**
**द्वारं तूर्ध्वभवञ्च भूमिरपरा ह्रस्वार्कभागैः क्रमात्।**
**प्रासादे च मठे नरेन्द्रभवने शैलः शुभो नो गृहे**
**तस्मिन् भित्तिसु बाह्याकासु शुभदः प्राग्भूमिकुम्भ्यां तथा।।**[१५]

**१०.सलगृहम् -** भूखण्डस्य ब्रह्मस्थानं विहाय पूर्वोत्तरभागे तलगृहः लघुरूपेण
निर्मेयम् ।

**११.अध्ययनकक्षः-**अध्ययनकक्षनिर्माणार्थं पश्चिमनैर्ऋत्योः स्थानं शुभ भवति। इदं स्थानं गुरुबुधयोः वर्तते। गुरुः ज्ञानस्य बुद्धेः हानिकारकः। अतः स्थानमिदं अध्ययनकक्षाय श्रेयस्करम्।

**१२.प्रतीक्षालयः-** प्रतीक्षालयः पूर्वेशानयोः मध्ये निर्मेयम्। यदि गृहस्य द्वारं पूर्वाभिमुखं तिष्ठति, अन्या पश्चिमे द्वारं स्यात् तर्हि पश्चिमवायव्योः मध्ये उत्तरे स्यात् तदा वायव्योत्तरयोः मध्ये दक्षिणे चेत् दक्षिणाग्न्योः मध्ये विधेयम्। एवमेव सर्वेषां वर्णनं सूक्ष्मतया विलोक्यते विस्तारभयात् संक्षेपेण अत्र प्रस्तुतम्।

मुहुर्त्तचिन्तामणौ दिग् अनुरोधेन सर्वं वर्णितं यथा-

**स्नानाग्निपाकशयनास्त्रभुजश्च धान्य-**
**भाण्डारदैवतगृहाणि च पूर्वतः स्युः।**
**तन्मध्यतस्तु मथनाज्यपुरीषविद्या-**
**भ्यासाख्यरोदनरतौषधसर्वधाम्॥**

**१३. शोकगृहम् -** विषस्य विषमौषधम् इत्यादिना आसुरादिवास्तुपदे शोकगृहं निर्मीयेत्।

इत्थं सर्वं वास्तुपदानुसारेण तस्य स्वभावगुणस्थितिवशात् आभ्यन्तरकक्षाणां निर्माणं कर्त्तव्यमिति शास्त्राभिमतम्।

**गृहबाह्यस्थितिः-**

गृहस्य बाह्यवातावरणं कीदृशं भवेद् इति विचारः क्रियते चेत् उच्यते यत् तत्र गृहस्य बाह्यस्थितानां निम्नलिखितपक्षानां विचारः क्रियते-

१. मुख्यद्वारविचार:
२. प्राङ्गणविचारः
३. वाटिकावृक्षवनस्पतीनां व्यवस्था, अन्य पर्यावरणसम्बन्धिविचार:
४. देवालयादिछायाविचार:

**प्रधानद्वारविचारः-**

गृहे एकं मुख्यद्वारं भवति। यतो हि मुख्यद्वाररहिते गृहे प्रवेशः निषिद्धः। यथा-

**अकपाटमनाच्छन्नमदत्तवलिभोजनम्।**
**गृहं न प्रविशेद्धीमान् विपदामाकरं तु तत्।।**[१६]

द्वारनिर्णये उच्यते तत्र-

**नवभागं गृहं कृत्वा पञ्चभागन्तु दक्षिणे।**

**त्रिभागमुत्तरे कार्य शेषं द्वारं प्रकीर्तितम्।।**[17]

अर्थात् गृहं भवनं नवभागं समाननवविभागं कृत्वा तेषु दक्षिणे पञ्चमार्ग उत्तरे याने विभाग कार्यम्। शेष स्थान द्वारं प्रकीर्तितम् द्वार वेधरहितं स्यादिति महत्वपूर्णः पक्षः, वेधरहितं भवितव्यम् ।

**१. मार्गवेधः -** तागृहपतिनाशकारकः

**२. वृक्षवेपस्तदा-** बालानां हानिकारक

**३. कृपवेधः -** मृगीरोगकारकः

**४. स्तम्भवेधः -** स्त्रियांदोषकारकः

**५. पङ्कवेधः -** शोककारकः

**६. देवालयवेषः -** विनाशकारकः

अत एव विद्यते यत्-

**रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणः**
**पङ्कद्वारे शोको व्ययोऽ म्बुणि साविणः प्रोक्तः।**
**कूपेनोस्कारो भवति विनाशश्च देवताविद्ध**
**स्तम्भेन स्त्रीदोषाः कुलनाशो ब्राह्मणोऽभिमुखो।।**[18]

**प्राङ्गणविचारः-**

प्राचीनाचार्यानुसारेण भूखण्डस्य मध्यभागे प्राङ्गणं स्यात्। केन्द्रस्थानमेव प्राङ्गणे प्रशस्तं प्राङ्गणं वर्गाकारम् आयताकारं वा स्यात्। प्राङ्गणस्य लम्बमानं विस्तृति प्रमाणे योज्य अष्टभिः गुण्यते नवभिर्भज्यते, तदा यदि शेषं २, ३, ४, ५, ७ आयाति तर्हि प्राङ्गणं शुभम्।

प्राङ्गण मध्ये उच्च स्यात् परन्तु अधिकौच्चं न स्यात् मध्ये अधो प्राङ्गणं पुत्रनाशकं भवति-

**मध्ये निम्नत्वक्रणग्रं तथोच्चैः।**
**शाश्वच्चैवं पुत्रानाशाय गेहम्।।**[19]

**पादटिप्पणी -**

१.राजवल्लभवास्तुशासम् ५/४२
२.राजवल्लभवास्तुशासम् ५/४३
३.राजवल्लभवास्तुशासम् ५/४५
४.राजवल्लभवास्तुशासम् ५/४६
५.विश्वकर्मप्रकाशः
६.अमरकोषः२/२/१२
७.समराङ्गणसूत्रधारः
८.वास्तुसौख्यम्
९.वशिष्ठसंहितायाम् पृ.-४१०
१०.मूहूर्तचिन्तामणि भूमिका
११.वास्तुसारः- गृहनिर्माणप्रकरणम्-८१
१२.वास्तुसारः- गृहनिर्माणप्रकरणम्-९०
१३.वास्तुरत्नाकरः
१४.भारतीय वास्तुविद्या के वैज्ञानिक आधार
१५.मूहूर्तचिन्तामणिः १२/२१
१६.वा.र-२/३९
१७.वा.र.ग.द्वारनिर्णयः
१८.वास्तुरत्नावली-गृ.सारणि
१९.वास्तुवल्लभम्-९/४